ग्र. क्रं. ६ संस्कृत.

# प्रश्नोपनिषद.

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

॥श्रीगणेशायनमः अथप्रश्नोपनिषदप्रारंभः॥ ॐ भद्रंकर्णेभिः० बृहस्पतिर्दधातु०
॥ॐ शांतिः ३ ॥ सुकेशाच भारद्वाजः शैब्यश्चसत्यकामः सौर्यायणीच गार्ग्यः कौसल्य
श्चाश्वलायनोभार्गवोवैदर्भिः कबंधीकात्यायनस्तेहैते ब्रह्मपरा ब्रह्मनिष्ठाः परंब्रह्मान्वे
षमाणा एषहवैतत्सर्वंवक्ष्यतीतिते हसमित्पाणयोभगवंतंपिप्पलादमुपसन्नाः तान्‌ सह
ऋषिरुवाच भूयएवतपसाब्रह्मचर्येण श्रद्धया संवत्सरं संवत्स्यथयथाकामंप्रश्नान्पृछ
तयदिविज्ञास्यामः सर्वंहवोवक्ष्यामइति अथ कबंधीकात्यायनउपेत्यपप्रछ भगवन्कुतो
हवाइमाः प्रजाः प्रजायंतइतितस्मैसहोवाचप्रजाकामोवैप्रजापतिः सतपोतप्यत सतप
स्तासमिथुनमुत्पादयते रयिंचप्राणंचेत्येतौमेबहुधाप्रजाः० करिष्यतइत्यादित्योहवैप्राणो

(2.)

प्रश्न०

१

रयिरेवचंद्रमारयिर्वाए।तत्सर्वंयन्मूर्तंचामूर्तंचतस्मान्मूर्तिरेवरयिरथादित्यउदयन्य
त्प्राचींदिशंप्रविशतितेनप्राच्यान्प्राणान्रश्मिषुसन्निधत्तेयद्दक्षिणांयत्प्रतीचींयदु
दीचींयदधोयदूर्ध्वंयदंतरादिशोयत्सर्वंप्रकाशयतितेनसर्वान्प्राणान्रश्मिषुसंनिध-
त्तेसएषवैश्वानरोविश्वरूपःप्राणोग्निरुदयतेतदेतदृचाभ्युक्तं॥विश्वरूपंहरिणंजात
वेदसंपरायणंज्योतिरूपंतपंतं।सहस्ररश्मिःशतधावर्तमानःप्राणःप्रजानामुदयत्ये
षसूर्यः॥संवत्सरोवैप्रजापतिस्तस्यायनेदक्षिणंचोत्तरंचतद्येहवैतदिष्टापूर्तेकृतमित्यु
पासतेतेचांद्रमसमेवलोकमभिजयंतेतएवपुनरावर्तंतेतस्मादेतऋषयःप्रजाकामाद
क्षिणंप्रतिपद्यंतएषहवैरयिर्यःपितृयाणोथोत्तरेणतपसाब्रह्मचर्येणश्रद्धयाविद्यया=

(2A)

त्मानमन्विष्यादित्यमभिजयंते एतद्वै प्राणानामायतनमेतदमृतमभयमेतत्पराय
णमेतस्मान्नपुनरावर्तंतइत्येषनिरोधस्तदेषश्लोकः पंचपादंपितरंद्वादशाकृतिंदि
वआहुःपरेअर्धेपुरीषिणं। अथेमेअन्यउपरेविचक्षणंसप्तचक्रेषडरआहुरर्पित
मिति। मासोवैप्रजापतिस्तस्यकृष्णपक्षएवरयिःशुक्लःप्राणस्तस्मादेतऋषयःशुक्ल
इष्टंकुर्वंतीतरइतरस्मिन्नहोरात्रोवैप्रजापतिस्तस्याहरेवप्राणोरात्रिरेवरयिःप्राणंवा
एतेप्रस्कंदंतियेदिवारत्यासंयुज्यंतेब्रह्मचर्यमेवतद्यद्रात्रौरत्यासंयुज्यंतेअन्नंवैप्रजा
पतिस्ततोहवैतद्रेतस्तस्मादिमाःप्रजाःप्रजायंतइतितद्येहवैतत्प्रजापतिव्रतंचरं
तितेमिथुनमुत्पादयंतेतेषामेवैषब्रह्मलोकोयेषांतपोब्रह्मचर्यंयेषुसत्यंप्रतिष्ठितंतेषा
मसौविरजोब्रह्मलोकोनयेषुजिह्ममनृतंनमायाचेति॥ १ ॥अथहैनंभार्गवोवैदर्भिः

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(3)

प्रश्न० २

पप्रछभगवन्कत्येवदेवाःप्रजांविधारयंतेकतरएतएतत्प्रकाशयंतेकःपुनरेषांवरि
ष्ठइतितस्मैसहोवाचाकाशोहवाएषदेवोवायुरग्निरापःपृथिवीवाङ्मनश्चक्षुः
श्रोत्रंचतेप्रकाश्याभिवदंतिवयमेतद्बाणमवष्टभ्यविधारयामस्तान्वरिष्ठःप्राणउ
वाचमामोहमापद्यथाहमेवैतत्पंचधात्मानंप्रविभज्यैतद्बाणमवष्टभ्यविधारया-
मीतितेऽश्रद्दधानाबभूवुःसोऽभिमानादूर्ध्वमुत्क्रामतइवतस्मिन्नुत्क्रामत्यथेतरेस
र्वएवोत्क्रामंतेतस्मिंश्चप्रतिष्ठमानेसर्वएवप्रातिष्ठंतेतद्यथामक्षिकामधुकरराजा
नमुत्क्रामंतंसर्वाएवोत्क्रामंतेतस्मिंश्चप्रतिष्ठमानेसर्वाएवप्रातिष्ठंतएवंवाङ्मनश्च-
क्षुःश्रोत्रंचतेप्रीताःप्राणंस्तुन्वंत्येषोऽग्निस्तपत्येषसूर्यएषपर्जन्योमघवानेषवायु २
रेषपृथिवीरयिर्देवःसदसच्चामृतंचयत्।अराइवरथनाभौप्राणेसर्वंप्रतिष्ठितं।

(३अ)

ऋजोयजूंषिसामानियज्ञः क्षत्रंब्रह्मच। प्रजापतिश्चरतिगर्भेत्वमेवप्रतिजायसे
।तुभ्यंप्राणप्रजास्त्विमाबलिंहरंतियः प्राणैः प्रतितिष्ठसि। देवानामसिवन्हितमः पि
तॄणांप्रथमास्वधा। ऋषीणांचरितंसत्यमथर्वांगिरसामसि। इंद्रस्त्वंप्राणतेजसारु
द्रोसिपरिरक्षिता। त्वमंतरिक्षेचरसिसूर्यस्त्वंज्योतिषांपतिः। यत्वमभिवर्षस्यथेमाः
प्राणतेप्रजाः। आनंदरूपास्तिष्ठंतिकामायान्नंभविष्यतीति। व्रात्यस्त्वंप्राणैकऋषिर
त्ताविश्वस्यसत्पतिः। वयमाद्यस्यदातारः पितात्वंमातरिश्वनः। यातेतनूर्वाचिप्रति
ष्ठितायाश्रोत्रेयाचचक्षुषि। याचमनसिसंततताशिवांतांकुरुमोत्क्रमीः। प्राणस्येदं
वशेसर्वंत्रिदिवेयत्प्रतिष्ठितं। मातेवपुत्रान्रक्षस्वश्रीश्चप्रज्ञांचविधेहिनइति॥ २॥

" Joint project of the Vaidika Sanshodhan Mandal, Pune and the Yashwantrao Chavan Pratishthan, Mumbai. "

(5)

प्रश्न० ३ अथहैनंकौसल्यश्चाश्वलायनः पप्रछभगवन्कुत एषप्राणोजायतेकथमायात्यस्मि
न्छरीरआत्मानंवाप्रविभज्यकथंप्रातिष्ठतेकेनोत्क्रमतेकथंबाह्यमभिधत्तेकथम
ध्यात्ममितितस्मैसहोवाचातिप्रश्नान्पृछसिब्रह्मिष्ठोसीतितस्मात्तेहंब्रवीम्यात्मन =
एषप्राणोजायतेयथैषापुरुषेछायैतस्मिन्नेतदाततंमनोकृतेनायात्यस्मिञ्छरीरेयथा
संम्राडेवाधिकृतान्विनियुंक्तेएतान्ग्रामानधितिष्ठस्वेत्येवमेवैषप्राणइतरान्प्रा
णान्पृथक्पृथगेवसन्निधत्तेपायूपस्थेपानंचक्षुःश्रोत्रेमुखनासिकाभ्यांप्राणःस्वयं
प्रातिष्ठतेमध्येतुसमानएषह्येतद्धुतमन्नंसमंनयतितस्मादेताःसप्तार्चिषोभवंतिहृदि ३
ह्येषआत्मात्रैतदेकशतंनाडीनांतासांशतंशतमेकैकस्याद्वासप्ततिर्द्वासप्ततिःप्रतिशा

(4A)

रवानाडीसहस्त्राणि भवंत्यासु व्यानश्चरत्यथैकयोर्ध्वउदानः पुण्येनपुण्यंलोकंनयतिपा
पेनपापमुभाभ्यामेवमनुष्यलोकमादित्योहवैबाह्यः प्राणउदयत्येषह्येनंचाक्षुषंप्राणम
नुगृह्णानः पृथिव्यांयादेवतासैषापुरुषस्यापानमवष्टभ्यांतरायदाकाशः ससमानोवायु
र्व्यानोयद्वाह्यंस्तेजोहवावउदानस्तस्मादुपशांतस्तेजाः पुनर्भवमिंद्रियैर्मनसिसंपद्यमा
नैर्यच्चित्तस्तेनैषप्राणमायातिप्राणस्तेजसायुक्तःसहात्मनायथासंकल्पितंलोकंनय
तियएवंविद्वान्प्राणंवेदनहास्यप्रजाहीयतेऽमृतोभवतितदेषश्लोकः। उत्पत्तिमायतिं
स्थानंविभुत्वंचैवपंचधा। अध्यात्मंचैवप्राणस्यविज्ञायामृतमश्नुते इति॥ ३ ॥अथ
हैनंसौर्यायणीगार्ग्यः पप्रछ भगवन्नेतस्मिन्पुरुषेकानिस्वपंतिकान्यस्मिन्जाग्रतिकत

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(5)

प्रश्न० रएषदेवःस्वप्नान्पश्यतिकस्यैतत्सुखंभवतिकस्मिन्नुसर्वेसंप्रतिष्ठिताभवंतीतित
४ स्मैसहोवाचयथागार्ग्यमरीचयोर्कस्यास्तंगच्छतःसर्वाएतस्मिंस्तेजोमंडलएकीभवं
तिताःपुनःपुनरुदयतःप्रचरंत्येवंहवैतत्सर्वंपरेदेवेमनस्येकीभवतितेनतर्ह्येषपुरु=
षोनशृणोतिनपश्यतिनजिघ्रतिनरसयतेनस्पृशतेनाभिवदतेनादत्तेनानंदयतेनवि
सृजतेनेयायतेस्वपितीत्याचक्षतेप्राणाग्नयएवैतस्मिन्पुरेजाग्रतिगार्हपत्योहवाएषोपानो
व्यानोन्वाहार्यपचनोयद्गार्हपत्यात्प्रणीयतेप्रणयनादाहवनीयःप्राणोयदुच्छ्वासनिःश्वासावे
तावाहुतीसमंनयतीतिससमानोमनोहवावयजमानइष्टफलमेवोदानःसएनंयजमान= ४
महरहर्ब्रह्मगमयत्यत्रैषदेवःस्वप्नेमहिमानमनुभवतियद्दृष्टंदृष्टमनुपश्यतिश्रुतंश्रुतमे

(5A)

वार्थमनुशृणोतिदेशदिगंतरैश्चप्रत्यनुभूतंपुनःपुनः प्रत्यनुभवतिदृष्टंचादृष्टंचश्रुतं =
चाश्रुतंचानुभूतंचाननुभूतंचसच्चासच्च सर्वंपश्यति सर्वः पश्यतिसयदातेजसाभिभू
तोभवत्यत्रैषदेवः स्वप्नान्नपश्यत्यथतदैतस्मिंछरीरएतत्सुखंभवतिसयथासोम्यव
यांसिवासोवृक्षंसंप्रतिष्ठं।तएवंहवैतत्सर्वंपरआत्मनिसंप्रतिष्ठतेपृथिवीचपृथिवीमा
त्राचापश्चापोमात्राचतेजश्चतेजोमात्राचवायुश्चवायुमात्राचाकाशश्चाकाशमात्राच
चक्षुश्चद्रष्टव्यंचश्रोत्रंचश्रोतव्यंचघ्राणंचघ्रातव्यंचरसश्चरसयितव्यंचत्वक्चस्पर्शयित
व्यंचवाक्चवक्तव्यंचहस्तौचादातव्यंचोपस्थश्चानंदयितव्यंचपायुश्चविसर्जयितव्यंच
गंतव्यंचमनश्चमंतव्यंचबुद्धिश्चबोद्धव्यंचाहंकारश्चाहंकर्तव्यंचचित्तंचचेतयितव्यंचते

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(6)

प्रश्न० जश्च विद्योतयितव्यं च प्राणश्च विधारयितव्यं चैष हि द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता
५ मंता बोद्धा कर्ता विज्ञानात्मा पुरुषः स परे ऽक्षरे आत्मनि संप्रतिष्ठते परमेवाक्षरं प्र
तिपद्यते स यो ह वै तदछायमशरीरमलोहितं शुभ्रमक्षरं वेदयते यस्तु सोम्य स सर्व
ज्ञः सर्वो भवति तदेष श्लोकः ॥ विज्ञानात्मा सह देवैश्च सर्वैः प्राणा भूतानि संप्रति
ष्ठंति यत्र तदक्षरं वेदयते यस्तु सोम्य स सर्वज्ञः सर्वमेवाविवेशेति ॥ ४ ॥ अथ हैनं
शैब्यः सत्यकामः पप्रछ स यो ह वै तद्भगवन्मनुष्येषु प्रायणांतमोंकारमभिध्यायीत क
तमं वाव स तेन लोकं जयतीति तस्मै स होवाच एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकारस् ५
तस्माद्विद्वानेतेनैवायतनेनैकतरमन्वेति स यद्येकमात्रमभिध्यायीत स तेनैव संवेदि

(6A)

नस्तूर्णमेव जगत्याम भिसंपद्यते तमृचो मनुष्यलोकमुपनयंते स तत्र तपसा ब्रह्मचर्ये
ण

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

# मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com